श्री राम पंचरत्नं

श्री राम पंचरत्नं

कंजातपत्रायतलोचनाय
कर्णावतंसोज्ज्वलकुंडलाय |
कारुण्यपात्राय सुवंशजाय
नमोऽस्तु रामाय सलक्ष्मणाय || 1 ||

विद्युन्निभांभोदसुविग्रहाय
विद्याधरैः संस्तुतसद्गुणाय |
वीरावताराय विरोधिहंत्रे
नमोऽस्तु रामाय सलक्ष्मणाय || 2 ||

संसक्तदिव्यायुधकार्मुकाय
समुद्रगर्वापहरायुधाय |
सुग्रीवमित्राय सुरारिहंत्रे
नमोऽस्तु रामाय सलक्ष्मणाय || 3 ||

पीतांबरालंकृतमध्यकाय
पितामहेंद्रामरवंदिताय |
पित्रे स्वभक्तस्य जनस्य मात्रे
नमोऽस्तु रामाय सलक्ष्मणाय || 4 ||

नमो नमस्तेऽखिलपूजिताय
नमो नमश्चंद्रनिभाननाय |
नमो नमस्ते रघुवंशजाय
नमोऽस्तु रामाय सलक्ष्मणाय || 5 ||

इमानि पंचरत्नानि त्रिसंध्यं यः पठेन्नरः |
सर्वपापविनिर्मुक्तः स याति परमां गतिं || 6 ||

इति श्रीरामकर्णामृतांतर्गतं श्रीरामपंचरत्नं |